ॐ श्रीगणेशाय नमः रामचंद्रपदद्वंद्वं नत्वा व्याकृतिखंडनं कुरुते नागेशभट्टाचार्यो लघुमंजूषे १ किमिदं व्याकरणत्वं साधुशब्दानुशासकत्वं साधुशब्दानुशासकत्वमित्यत्र शासमानामप्रकृतिप्रत्ययकल्पनं, तत्र किमिदं प्रत्ययत्वं नाम अर्थप्रत्यायकत्वं ज्ञानविशेषत्वं वा २ संकेतवत्त्वं वा ३ प्रकृतेरतः प्रयुज्यमानत्वं वा ४ तत्र प्रथमः प्रकृतावतिव्याप्तेः नहि तीयः घटज्ञानादेरपि वैयाकरणानां प्रत्ययत्वप्रसंगात् न तृतीयः प्रकृतावतिव्याप्तेः न चतुर्थः वृक्षादावव्याप्तेः विभक्तिसंज्ञकेषु परस्मादिति सूत्रेविधीयमानवृक्षप्रत्ययेऽव्याप्तिः किंच द्वितीयपक्षे ज्ञानसमवेतो वा ज्ञानविशेषसमवेतो वा अथैको विषयः द्रव्यं वा गुणो वा कर्म वा धर्मो वा विशेषो वा समवायो वा अभावो वा न तावद्द्रव्यादिकं वैयाकरणानां तत्प्रत्ययत्वव्यवहारभावात् नहि तीयः स्वरूपतो विशेषे व्याप्तयमाने ज्ञानस्य साकारकत्वप्रसंगात् न तृतीयः अर्थे नैव विशेषो हि निराकारत्वाधियां व्यक्तिविशेषश्रितत्वज्ञानानां तात्कालिकत्वात् पदप्रत्ययत्वव्यवहारो जायते प्राक्तनविशेषविषयज्ञानत्वे सप्राक्तनविशेषः कः यमवच्छिद्य प्रत्ययइति व्यवहारमाचरते प्रकृतेः उरलादावप्रयुज्यमानः प्राक्तन इति चेन्न वृक्षप्रत्ययेऽव्याप्तेः यत्र योगमंतरेण प्रकृतेर्न साधुत्वमिति चेन्न चकासांचकारेत्यादौ कृञादेरपि प्रत्ययत्वप्रसंगात् प्रातिपदिकात्परतः प्रयुज्यमानत्वमिति चेन्न अन्योन्याश्रयात् अर्थवदधातुरप्रत्ययः प्रातिपदिकमित्यत्र प्रत्ययो वर्जितस्य प्रातिपदिकत्वात् ततश्च प्रातिपदिकज्ञाने प्रत्ययज्ञानं प्रत्ययज्ञाने प्रातिपदिकज्ञानं इति एकत्वादिः अर्थप्रातिपदिकत्वं प्रत्ययत्वं इति चेन्न प्रकृतादावपि प्रत्ययत्वप्रसंगात् कर्मादिकारकबोधकत्वं प्रत्ययत्वमिति चेन्न तिङादावव्याप्तेः सार्वधातुकत्वं प्रत्ययत्वं इति चेन्न उरलादावव्याप्तेर्यथा मेघ्ये यदर्थः प्राधान्येन प्रतीयते स प्रत्ययइति चेन्न कृष्टे

१ नपि पञ्चतीत्यादौ पश्य ॥ २ रपि प्रत्ययस्य प्रसङ्गात् पदार्थेन संधानमंतरेण प्रकृतेर्प्रयुज्येदेव सप्रत्ययप्रतिषेधेन
मानत्वादत्यारावसंभवात् प्रयुज्यत्वप्रतिषेधेन नेति तन्नहीदं लक्षणं निष्ठं प्रकृतौ प्रयुज्यमानायां पदार्थः प्रतीयतेऽ
क वेति चेन्न प्रकृतावतिव्याप्तेः प्रतिपदसंज्ञाभिन्नशब्दत्वमिति चेन्न प्रभवतिचेत्यादावतिव्याप्तेः ननु तस्यापि प्रकृति
त्वमिति चेन्न तर्हि प्रकृतिभिन्नमित्येवास्तु किमिदं प्रकृतित्वं प्रातिपदिकत्वं वा २ प्रत्ययान्तत्वं प्रयुज्यमानत्वं वा ३ प्रयु
ज्यमानस्य प्रत्ययस्य साधुत्वनिर्वाहकत्वं वा ३ अनेकप्रत्ययसंसर्गिशब्दत्वं वा ५ कृदंतनाधितांतसमासप्रातिपदि
कान्यतमशब्दत्वं वा ५ अभियुक्तपरिभाषितशब्दत्वं वा ६ धात्वादित्वं वा ७ यतः परस्य प्रत्ययः प्रयुज्यते तादृ
शशब्दत्वं वा ८ संख्याभिमतत्वविशेषो वा ९ स्वभाववाचिशब्दविशेषो वा १० प्रकृष्टाकृतिः प्रकृतिरिति
विग्रहेयत्वविशेषो वा ११ किंविशेषो वा १२ प्रत्ययेनैव सह प्रयुज्यमानशब्दो वा १३ अन्यद्वा १४ नतावदाद्यः
धात्वादावव्याप्तेः १ नहि तीयः बहुचप्रत्ययपूर्वकप्रकृतेः प्रकृतित्वाभावप्रसंगात् प्रत्ययैकदेशागमादाव
तिव्याप्तेश्च प्रत्ययैकदेशोपि प्रत्ययएवेति चेत् किमिदमेकदेशत्वं अवयवविभागः नतृतीयः वर्तमानत्व
दादेः प्रातिपदिकमित्यादिप्रयुज्यमानप्रशब्दादावव्याप्तेः नपंचमः धात्वादावव्याप्तेः लक्षणप्रा
तिपदिकपरस्थाने धातुपदप्रवेशेप्यस्य सर्वत्रैवेतरेतराश्रयः नपाहि प्रकृतिस्थितौ प्रत्ययस्थितिः प्रत्ययस्थि
तौ प्रकृतिस्थितिरिति नषष्ठः अभिमुक्तत्वव्याकरणाभिज्ञत्वं प्रागस्त्वातराभिज्ञत्वं वा प्रथमपक्षे आत्मा
श्रयः द्वितीयेतिव्याप्तेः ॥ अस्य कस्यापि येनके नपरिभाषितत्वात् किंचिपरिभाषायोपकः संकेतः स्व
प्रत्ययोपि तुल्यः सप्रमोपि न आदिशब्दाद्यापरिज्ञानात् धातुत्वस्याप्यनिर्वचनात् नाषष्ठमः

अधुनादिशब्देऽव्याप्तेः बहुचपूर्वकप्रकृतावव्याप्तिश्च नपंचमः प्रसंगभावात् नहि वैयाकरणसंख्याभिमतेषु धान
शब्दा अपि तत्रैव प्रकृतिशब्दैकदाचिदपि प्रयुज्यते नदशमः रामशब्दादिभ्यः प्रत्यनुपपत्तिप्रसंगात् अव्याप्तेः
मेकादशः उभयत्राप्यसंभवात् नहि तादृशेर्थे प्रकृतिशब्दव्यवहारो वैयाकरणानां नद्वादशः प्रातिपदिकादावति
व्याप्तेः तिबादिप्रत्ययैः सहशब्दादीनां प्रयुज्यमानत्वात् नत्रयोदशः तदनिरुक्तेः परसंस्कारत्वं वैयाकरणत्वं
वा कोपि संस्कारत्वं वा प्रथमपक्षे किमिदं परत्वं नामसंश्लिष्टं तत्पदं प्रत्येकं नदंतस्य परत्वं तिव्याप्तिः स
मुदितं नदंतस्य परत्वेऽसंभवः संश्लिष्टत्वं परत्वे संश्लिष्टयोर्न्यत्वमेव नत्रयस्य समस्तयोर्दूषितत्वात्
विभक्त्यंतं पदं इत्यत्रापि स्यादित्यादिरूपैव विभक्तिः नदंतत्वे प्रत्येकं समुदायविकलसमुदायवदग्रहणा
त् वतीयपक्षे समूहः पदमिति चेन्न वाक्येतिव्याप्तेः आदिपदेव्याप्तेश्च नद्वितीयः पदसमूहस्यैव वाक्य
त्वात् पदस्य चरवंडितत्वात् वाक्यलक्षणेतरस्यानिर्वचनात् तन्निर्वचने व्याकरणेतदनुपयोगा
त् नहि तादृशानां संस्कारः इति श्रीमहोपाध्याय कुशलाचार्यचेद्रश्रीवाचस्पतिमहाचार्यविरचितो वा

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017